श्रोतुं), आश्रु, उपश्रु, निशम् (c. 10. -शामयति -यितुं), कर्णं दा (c. 3. ददाति, दातुं), श्रवणं कृ.—(Heed, lend the mind) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्, अवधानं कृ; 'listen,' शृणु, कर्णं देहि, अवधीयतां.—(Obey, follow admonition) श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं).

LISTENER, *s.* श्रोता *m.* -त्री *f.* (तृ), श्रवणकर्त्ता *m.* -र्त्री *f.* (र्तृ), निशमनकारी *m.* -रिणी *f.* (न्).

LISTLESS, *a.* अनुत्सुकः -का -कं, निरुत्सुकः -का -कं, अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, निरिच्छः -च्छा -च्छं, निःस्पृहः -हा -हं, निरीहः -हा -हं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, विरक्तः -क्ता -क्तं, वीतरागः -गा -गं, विकौतुकः -का -कं, अनभिलाषः -षा -षं, अनवधानः -ना -नं, अनवहितः -ता -तं, निरुद्योगः -गा -गं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, अप्रयत्नशीलः -ला -लं, अनास्थः -स्था -स्थं, आस्थाहीनः -ना -नं, सुप्तबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., अव्यग्रः -ग्रा -ग्रं, निःसङ्गः -ङ्गा -ङ्गं, ग्लानः -ना -नं, प्रमादी -दिनी &c. *See* LANGUID.

LISTLESSLY, *adv.* अनुत्सुकं, निरुत्सुकं, अनिच्छया, अनौत्सुक्येन, उदासीनवत्, अनभिलाषेण, अनवधानेन, अनवहितं, अनपेक्षया, जडवत्, अव्यग्रं. *See* LANGUIDLY.

LISTLESSNESS, *s.* अनुत्सुकता, अनौत्सुक्यं, निरुत्सुकता, अनिच्छा, अनीहा, निरीहता -त्वं, अस्पृहा, निःस्पृहता, अनभिलाषः, उदासीनता, औदास्यं, विरक्तिः *f.*, विरक्तता, वैराग्यं, अननुरागः, अनपेक्षा, अनवेक्षा, अनुत्साहः, अनुद्योगः, अप्रयत्नः -त्नता, अनास्था, आस्थाहीनता, सुप्तबुद्धित्वं, जडता, जाड्यं, अव्यग्रता, मान्द्यं, ग्लानिः *f.* *See* LANGUOR.

LITANY, *s.* ख्रीष्टीयमतधारिभिर् व्यवहृतः प्रार्थनामार्गः, ख्रीष्टीयसमाजव्यवहारिता प्रार्थना.

LITERAL, *a.* (Not figurative) मूलार्थकः -का -कं, मुख्यार्थकः -का -कं, मुख्यः -ख्या -ख्यं, अरूपकः -का -कं, अव्यञ्जकः -का -कं, विवक्षितः -ता -तं, शक्यः -क्या -क्यं; 'literal occupation,' मुख्यत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः.—(Following the letter or exact words) मूलशब्दानुसारी -रिणी -रि (न्), मूलशब्दानुयायी -यिनी &c., मूलपदानुसारी &c., शब्दार्थानुसारी &c., संवयवार्थानुसारी &c., शब्दानुसारी &c. यथाशब्दः -ब्दा -ब्दं, शाब्दिकः -की -कं.—(Consisting of letters) अक्षरी -रिणी &c., अक्षरमयः -यी -यं.

LITERALITY, *s.* मुख्यत्वं -ता, मुख्यार्थत्वं, मूलार्थत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः, शब्दार्थः, अव्यञ्जनं -ना, अरूपकं.

LITERALLY, *adv.* (Not figuratively) मूलार्थानुसारेण, मुख्यार्थानुसारेण, मूलार्थतस्.—(Close to the letter or exact words) शब्दतस्, ग्रन्थतस्, यथाशब्दं, शब्दानुसारेण -रतस्, मूलशब्दानुसारेण, मूलपदानुसारात्, शब्दार्थतस्.—(Letter by letter) अक्षरशस्.

LITERARY, *a.* (Pertaining to literature) विद्यासम्बन्धी -न्धिनी -न्धि (न्), विद्याविषयः -या -यं, अक्षरसम्बन्धी &c., शास्त्रिकः -की -कं, शास्त्रीयः -या -यं, विद्याप्रकरणसम्बन्धी &c., साहित्यसम्बन्धी &c.—(Versed in literature, fond of it) विद्यावान् -वती -वत् (त्), शास्त्राभिज्ञः -ज्ञा -ज्ञं, विद्याप्रियः -या -यं, विद्यासेवी -विनी &c., विद्यानुसेवी &c., विद्यानुरागी -गिणी &c., विद्याव्यवसायी -यिनी &c., विद्यानुपाली -लिनी &c., विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं.

LITERATE, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), विद्यासम्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, विद्वान् -दुषी -द्वत् (स्), विपश्चित् *m.f.n.*, साक्षरः -रा -रं

LITERATI, *s. pl.* पण्डितमण्डली -लं, पण्डितसमाजः, विद्वत्समाजः, पण्डितगणः, पण्डितवर्गः, पण्डितसमूहः, विद्वद्वृन्दं.

LITERATURE, *s.* (Learning) विद्या, शास्त्रं, शास्त्रविद्या, अक्षरं, साहित्यं, वाङ्मयं.—(Collective body of literary productions) शास्त्रसमुदायः, शास्त्रसमवायः, शास्त्रसमूहः, often expressible by शास्त्र in the sing. number; as, 'poetical literature,' काव्यशास्त्रं 'branch of literature,' अङ्गं, उपशास्त्रं.

LITHE, *a.* शिथिलः -ला -लं, मृदुः -दुः -द्वी -दु, सुखनमनीयः -या -यं.

LITHENESS, *s.* शिथिलता, शैथिल्यं, सुनमनीयता, मृदुता, कोमलता.

*To* LITHOGRAPH, *v. a.* प्रस्तरोपरि or शिलोपरि लिख् (c. 6. लिखति, लेखितुं) or आलिख्, प्रस्तरं रेखादिना मुद्रीकृ or मुद्र् (nom. मुद्रयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

LITHOGRAPH, *s.* प्रस्तरमुद्रा, शिलामुद्रा, पाषाणमुद्रा, प्रस्तरालेख्यं, पट्टः.

LITHOGRAPHER, *s.* प्रस्तरलेखकः, प्रस्तरलिक् *m.* (ख्), प्रस्तरमुद्राकृत्, शिलामुद्राकृत्, शिलालेखकः, प्रस्तरालेख्यकृत्.

LITHOGRAPHY, *s.* प्रस्तरलिखनविद्या, प्रस्तरमुद्राङ्कनविद्या, शिलालिखनविद्या, शिलामुद्राङ्कनं, पाषाणलिखनं.

LITHONTRIPTIC, LITHONTRYPTIC, LITHONTHRYPTIC, *a.* अश्मरीघ्नः -घ्नी -घ्नं, अश्मरीहरः -रा -रं, मूत्राश्मनाशकः -का -कं.

LITHOTOMY, *s.* मूत्राश्मोच्छेदः, वस्तिस्थशर्करोच्छेदः, उच्छेदनद्वारा मूत्राश्मनिष्कर्षणं, वास्तिच्छेदनं, मूत्राधारच्छेदः.

LITHOTRIPSY, *s.* अश्मरीघर्षणं, अश्मरीसङ्घर्षः, अश्मरीसम्मर्दः, अश्मरीसम्पेषः.

LITIGANT, *a.* विवादी -दिनी -दि (न्), विवदमानः -ना -नं, विवादार्थी -र्थिनी -र्थि (न्), व्यवहारी -रिणी &c., व्यावहारिकः -की -कं, व्यवहारिकः &c., कार्य्यवान् -वती -वत् (त्), कार्य्यी -र्य्यिणी &c., विवदन् -दन्ती -दत् (त्).

LITIGANT, *s.* व्यवहर्त्ता *m.* (र्तृ), विवादी *m.* (न्), विवादार्थी, वादी *m.* अर्थी *m.*, कार्य्यवान् *m.* (त्), कार्य्यी *m.*

*To* LITIGATE, *v. n.* विवद् (c. 1. -वदते -दितुं), व्यवहृ (c. 1. -हरति -ते -हर्त्तुं), विवादं कृ, विवादार्थी -र्थिनी भू or अस्.

*To* LITIGATE, *v. a.* विवादास्पदीकृ, व्यवहारास्पदीकृ, वादग्रस्तं -स्तां कृ.

LITIGATED, *p. p.* विवादास्पदीकृतः -ता -तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं, वादानुगतः -ता -तं, वादग्रस्तः -स्ता -स्तं, विवादग्रस्तः -स्ता -स्तं.

LITIGATION, *s.* विवादः, विवादकरणं, वादः, वादकरणं, व्यवहारः, व्यवहारकरणं, रिक्थं; 'under litigation,' विवादास्पदीभूतः -ता -तं, वादग्रस्तः -स्ता -स्तं. *See* LITIGATED.

LITIGIOUS, *a.* विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादप्रियः -या -यं, विवादार्थी -र्थिनी &c., वादप्रियः -या -यं, विवादप्रवणः -णा -णं, विवादबुद्धिः -द्धिः -द्धि, विवादासक्तः -क्ता -क्तं, विवादरतः -ता -तं.

LITIGIOUSNESS, *s.* विवादशीलता, विवादार्थित्वं, विवादासक्तिः *f.*, विवादबुद्धिः *f.*

LITTER, *s.* (Bed borne on the shoulders) शिविका, याप्ययानं, डयनं, डलकं, प्रवहणं, इत्या, शिरस्का.—(Bed of straw) तृणशय्या, तृणशयनं, तृणसंस्तरः, तृणास्तरणं.—(Brood of young animals) शावकगणः, यः शावकगण एकवारे जायते, शावकसमूहः; 'of pigs,' शूकरशावकगणः.—(Shreds scattered about) इतस्ततो विकीर्णा वस्त्रखण्डाः.—(Confusion of things scattered about) द्रव्यविक्षिप्तता, द्रव्यविकीर्णता, द्रव्यव्यस्तता, द्रव्यसङ्करः, साङ्कर्य्यं, अस्तव्यस्तता.

*To* LITTER, *v. a.* (Bring forth a number of young ones) शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति